# 7 सुभाषितानि

पुस्तकेषु हि या विद्या परहस्तेषु यद् धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद् धनम्॥ १ ॥
वृक्षः फलान्वितः भाति वृक्षं धूनयते कपिः
वृक्षेण वार्यते तापः जलं वृक्षाय दीयते।
वृक्षात् पतन्ति पर्णानि वृक्षस्य प्रसरो महान्
वृक्षे खगाः निकूजन्ति वृक्ष धन्योऽसि भूतले॥ २ ॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद् रिपुः।
व्यवहारेण हि जायन्ते मित्राणि रिपवस्तथा॥ ३ ॥
पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः॥ ४ ॥
गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयू महेन्द्रतनया चर्मण्वती वेदिका।
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी
पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्वन्तु मे मङ्गलम्॥ ५ ॥
घृष्टं घृष्टं पुनरपि पुनःचन्दनं चारुगन्धं।
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम्।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं।
न प्राणान्ते प्रकृतिविकृतिर्जायते सज्जनानाम्॥ ६ ॥

## Glossary

**परहस्तेषु** in the hands of other **भाति** looks beautiful **कार्यकाले समुत्पन्ने** when there is need **धूनयते** shakes **कपिः** monkey **वार्यते** is prevented **दीयते** is given **प्रसरः** spread **भूतले** on the earth **रिपुः** enemy **अम्भः** water **सस्यम्** grain **वारिवाहा** clouds **सताम्** of the gentlemen **घृष्टम्** rubbed **इक्षुदण्डम्** sugarcane stick **दग्धम्** burnt



Get More Learning Materials Here : CLICK HERE www.studentbro.in

| | | | |
|---|---|---|---|
| धन्योऽसि – धन्यः असि | | नादन्ति – न अदन्ति | |
| कस्यचिन्मित्रं – कस्यचित् मित्रम् | | पुनरपि – पुनः अपि | |
| रिपवस्तथा – रिपवः तथा | | पुनश्चन्दनम् – पुनः चन्दनम् | |
| स्वयमेव – स्वयम् एव | | चैवेक्षुदण्डम्–च एव इक्षुदण्डम् | |
| नाम्भः – न अम्भः | | | |

## Exercise

**1. Pronounce the following words correctly :**

समुत्पन्ने, निकूजन्ति, कस्यचिन्मित्रम्, समुद्रसहिताः, चैवेक्षुदण्डम्, काञ्चनम्

**2. Answer the following questions :**

(1) कीदृशी विद्या कार्यकाले उपयुक्ता न भवति ?

(2) कस्य विभूतयः परोपकाराय सन्ति ?

(3) वृक्षे के निकूजन्ति ?

(4) मित्राणि तथा रिपवः केन जायन्ते ?

(5) पञ्चनदीनां नामानि लिखतु।

(6) सज्जनानां किं विकृतं न भवति ?

**3. Disjoin the Sandhi/Conjunct :**

(1) धन्योऽसि

(2) कस्यचिन्मित्रम्

(3) स्वयमेव

(4) पुनरपि

**4. Join the words.**

(1) रिपवः + तथा

(2) पुनः + चन्दनम्

(3) न + अम्भः

(4) च + एव + इक्षुदण्डम्

(5) न + अदन्ति



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**5. Write the following root verbs as shown in example :**

**Illustration :** पत् – पतन्ति

| | |
|---|---|
| (1) पा (पिब्) – | (5) लिख् – |
| (2) खाद् – | (6) दृश् (पश्य्) – |
| (3) गर्ज् – | (7) पठ् – |
| (4) वद् – | (8) नम् – |

**6. Fill in the blanks using the correct words from the brackets :**

(जलम्, अन्नम्, पुष्पान्, रसम्, फलानि)

(1) वारिवाहाः स्वयं ______ न खादन्ति।

(2) नद्यः स्वयं ______ न पिबन्ति।

(3) वृक्षाः स्वयं ______ न खादन्ति।

(4) पादपाः स्वयं ______ न जिघ्रन्ति।

(5) मधुमक्षिकाः स्वयं ______ न पिबन्ति।

**7. Complete the following :**

(1) पुस्तकेषु हि ______।
______ न तद् धनम्।

(2) पिबन्ति नद्यः ______।
______।
______।
______ सतां विभूतयः।

**8. Sing the Subhashit with correct pronunciations individually, in group.**

**Activity/Project-work**

- Find out Subhashitani from 'Subhashit-Ratnavali' from any other book/volume of Subhashit or from newspaper and write them.
- Collect and present the sayings or usages spoken in your area that also focus on the thoughts expressed in this Subhashitani.
- Collect the information about the local river or any other source of water.
- Divide the class into groups, collect the Subhashitani and prepare a manuscript of it.



Get More Learning Materials Here : CLICK HERE www.studentbro.in